# संस्कृत (संस्कृतम्)

## प्रथम प्रश्न पत्र : (भारतीय धर्म दर्शनं च)

समयावधि : घण्टात्रयम् पूर्णाङ्का : 100

1. निम्नाङ्कितेषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या करणीया–

(क) उष्णस्पर्शवत्तेजः। तच्च द्विविधं नित्यमनित्यञ्च।

(ख) रूपादि चतुष्टयं पृथिव्यां पाकजमनित्यञ्च। अन्यत्रापाकजं नित्यमनित्यञ्च।

(ग) आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः।

(घ) व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। 7½ + 7½

2. अधोलिखितेषु केषाञ्चन् पञ्चप्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन देयानि–

(क) यथार्थनुभवः कतिविधः भवति? (ख) व्याप्तेः लक्षणं लिखत?

(ग) दिव्यतेजसः लक्षणं लिखत? (घ) कारणं किं भवति?

(ङ) पक्षस्य लक्षणं लिखत? (च) उपमितेः लक्षणं लिखत?

(छ) वैशेषिक दर्शनस्य प्रणेता कः? (ज) के सप्त पदार्थाः?

(झ) कार्यस्य लक्षणं लिखत? (ञ) किं प्रत्यक्षम्? 5 × 2

3. अधोलिखितयोः ससन्दर्भव्याख्या करणीया– 7½ + 7½

(क) अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।।

**अथवा**

नासतो विद्यते भावो ना भावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तरस्त्वनयोस्तत्वदर्शिभिः।।

(ख) अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्त निधनान्येव तत्र का परिवेदना।।

**अथवा**

प्रजहानि यदा कामान् सर्वान्पार्थमनोगतान।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत।।

4. अधोलिखितेषु केषाञ्चन् पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्यमेन देयानि–

(क) संसारस्य अन्यजनाः कथामाचरन्ति? (ख) श्रीकृष्णमते महामानी कः?

(ग) परमार्थतः के भ्रष्टाः जायन्ते? (घ) चातुर्वर्ण्य कथं सृष्टम्?

questionpaperesult.com

Scanned by CamScanner

(ङ) मानुषे लोके सिप्रं किं भवति?

(च) भगवद्गीतायां कति अध्यायाः सन्ति?

(छ) स्थित प्रज्ञः कः भवति? (ज) कस्य प्रज्ञा प्रतिष्ठिता भवित?

(झ) संगात् कः जायते? (ञ) कृपणाः के भवन्ति? 5 × 2

5. अधोलिखितेषु सूत्रेषु व्यासभाष्यमाधृत्य सूत्रद्वयस्य व्याख्या कार्या– 7½ + 7½

(क) तदा दृष्टुः स्वरूपेऽवस्थानम्।

(ख) तत्र प्रत्यक्षानुमानागमाः प्रमाणानि।

(ग) तत्र स्थितौ यत्नोऽभ्यासः। (घ) तस्य वाचकः प्रणवः।

(ङ) ऋतम्भरा तत्र प्रज्ञा।

6. अधोलिखितेषु पञ्चप्रश्नानामुत्तराणि देयानि– 5 × 2

(क) पातञ्जल योगदर्शनस्य रचयिता कः?

(ख) योगदर्शनस्य प्रथमं सूत्रं किमस्ति? (ग) विपर्ययः कः भवति?

(घ) चित्तवृति निरोधस्य उपायः कः? (ङ) सम्प्रज्ञातयोगः कः भवति?

(च) निर्वितर्का समाधिः कीदृशी भवति? (छ) निर्बीजसमाधेः लक्षणं लिखत?

(ज) वैराग्य किं भवति? (झ) अभ्यासः कः भवति?

(ञ) ईश्वरस्य लक्षणं लिखत?

7. अधोलिखितेषु त्रयाणां श्लोकनां सप्रसंड्ग व्याख्याकरणीया– 5 × 3

(क) संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः।
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः।।

(ख) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनांमात्मनस्तुष्टिरेव च।।

(ग) श्रृतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ।।

(घ) एतद्देश प्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

(ङ) समाहृत्य तु तद् भैसं यावदन्नममायया।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः।।

(च) निषेकारीनि कर्माणि यः करोति यथाविधिः।
सम्भावयति चान्नेन स विप्रो गुरूरूच्यते।।

8. अधोलिखितानां केषाञ्चन् पञ्चप्रश्नानामुत्तराणि देयानि– 5 × 2

(क) मनुस्मृतेः लेखकः कः? (ख) धर्ममूलं किम्?

(ग) धर्मस्य साक्षात्लक्षणं किम्? (घ) द्विजानां मेखला कीदृशी कार्या?

(ङ) साधुषु गर्हणां कः याति? (च) कः जनः शूद्रवत् बहिष्कार्यः?

(छ) अभिवादनशीलस्य किं वर्धते? (ज) गुरूः कः भवति?

(झ) ब्रह्मचारिणः कति प्रकाराः? के च ते? (ञ) पिता कस्य मूर्ति?

questionpaperesult.com

Scanned by CamScanner